**अबुद्ध** त्रि० बुध—कर्त्तरि कर्म्मणि वा क्त न०त०। १बोधानाश्रये २बोधाविषये च। [सुचितं २तथाज्ञानाभावे।

**अबुद्धि** स्त्री अभावे न०त०। १ज्ञानाभावे यस्य यद्रूपेण ज्ञान-

**अबुद्धिपूर्व्वक** त्रि० अबुद्धिः पूर्व्वा यस्य। यथार्थबुद्धिपूर्व्वक-भिन्ने। "अबुद्धिपूर्व्वं हनने व्रतार्द्धमुपकल्पयेत्" स्मृतिः यदि गां गवयबुद्ध्या हन्ति, गवयं वा गोभ्रान्त्या हन्ति, सर्वथाऽबुद्धिपूर्बकत्वम् एवमन्यार्थक्षिप्तनाराचादिना हनने ऽपि तथात्वम्। इयं गौरिमां हन्मीत्युद्देशेनैव हनने बुद्धि-पूर्बकत्वम्। [२अल्पज्ञाने च।

**अबुध** पु० विरोधे अप्राशस्त्ये वा न०त०। १बुधभिन्ने मूर्खे

**अबु(बो)ध्य** त्रि० बुध बा० वेदे क्यप् लोके तु ण्यत्। ज्ञातुमशक्येऽर्थे "अबुध्यमबुध्यमानं सुषुपाणमिन्द्रम्" ऋ० ४, १८,२, ',अबुध्यं दुर्विज्ञेयमिति" भा०।

**अबुध्न** न० नास्ति बुध्नं मूलमस्य। १मूलशून्ये अन्तरिक्षे "अबुध्ने राजा वरुणो बलस्योर्द्ध्वम्" ऋ० १,२४,७, "अबुध्ने मूलशून्ये अन्तरिक्षे" भा०। २मूलशून्यमात्रे करकादौ त्रि०।

**अबोध** पु० अभावे न०त०। १बोधाभावे अज्ञाने "निसर्ग-दुर्बोधमबोधविक्लवाः" किरा०। न०ब०। २बोधरहिते त्रि०।

**अबोधगम्य** त्रि० बोधेन गम्यः विषयीकार्य्यः न०त०। ज्ञानेनाविषयीकार्य्ये ज्ञातुमशक्ये।

**अब्ज** न० अप्सु जायते जन—ड ७त०। १पद्मे, २ शङ्खे पुंन०। ३ निचुलवृक्षे तस्य जलप्रायभवत्वात् तथात्वम् ४ चन्द्रे ५ धन्वन्तरौ च पु० तयोः समुद्रजातत्वात् तथात्वम् "प्रसन्नात्मा समुत्पन्नः सोमः शीतांशुरुज्ज्वलः" इति 'धन्वन्तरिस्ततोदेव! वपुष्मानुदतिष्ठत" इति च भा०आ०प०। चन्द्रनामकत्वात् ६कर्पूरे पु०। "अर्बुदमब्जं खर्वनिखर्वमहापद्मशङ्कवस्तस्मादिति" लीलावत्युक्ते दशार्बुदसंख्यायां ७शत-कोटिसंख्यायां ८तत्संख्येये च न०। ९जलजातमात्रे त्रि० "स्थलजाः पक्षिणोऽब्जाश्च" इति 'अब्जेषु चैव रत्नेषु सर्व्वेष्वश्ममयेषु च" इति रामा०।

**अब्जकर्णिका** स्त्री अब्जस्य कर्णिका कर्णाभरणभेदइव तुल्याकारत्वात्। पद्ममध्यस्थसवर्त्तिकाख्ये पद्मावयवभेदे पद्मकर्णिका-दयोऽप्यत्र।

**अब्जज** पु० अब्जात् विष्णोर्नाभिकमलात् जायते जन—ड। चतुर्मुखे ब्रह्मणि तस्य विष्णुनाभिकमलजातत्वात्तथात्वम् "दृष्ट्वा भूतानि भगवान् लोकसृष्ट्यर्थमव्ययः। ब्रह्मणो जन्म-सहितं बहुरूपं विचिन्वति"। इत्युपक्रम्य 'ततस्तस्मिन्महातोये हविषो हरिरच्युतः। स्वपन् क्रीडंश्च विविधं मोदते वैस पावकिः पद्मं नाभ्युद्भवं चैकं समुत्पादितवांस्ततः। सहस्रपर्णं विरजो भास्कराभं हिरण्मयम्। अथ योग-विदां श्रेष्ठं सर्वभूतमनोमयम्। स्रष्टारं सर्वभूतानां ब्रह्माणं सर्वतोमुखम्। तस्मिन् हिरण्मये पद्मे बहुयोजनविस्तृते। इति समुत्पादितवानित्याकर्षः अनतिदूरे च "कस्त्वं पुष्करमध्यस्थः सितोष्णीषश्चतुर्मुखः। आवां न गणये-र्मोहादास्से त्वं विगतज्वरः। एह्यावयोर्बाहुयुद्धं प्रयच्छ कमलोद्भव!। इति तेन तस्य विष्णुनाभिकमलज त्वं तद्दृश्यत्वञ्च हरि०पौ०प०। "स्वराशौ स्वांशगे सौम्ये (बुधे) लग्नस्थे वा भृगोः सुते। जीवे वाऽब्जजयोगोऽयं यातुः शत्रुविनाशकृदिति" ज्योतिषोक्ते २ यात्रायोगभेदे च।

**अब्जबान्धव** पु० अब्जानां बान्धवइव प्रकाशकत्वात्। कमलप्रकाशके सूर्य्ये तस्योदये हि कमलं विकाशते इति कविसम्प्रदायप्रसिद्धिः। एवं कमलबान्धवादयोऽप्यत्र।

**अब्जभोग** पु० अब्जस्य शङ्खस्य भोगः अवयवइव भोगोयस्य। शङ्खावयवतुल्यावयवे वराटके। भुज्यते भुज—कर्म्मणि घञ् भोगः भोज्यम्। अब्जस्य भोज्यांशे पद्मकन्दे शालूके तस्य लोकैर्भुज्यमानत्वात् तथात्वम् कमलभोगादयोऽप्यत्र।

**अब्जयोनि** पु० अब्जं विष्णुनाभिकमलं योनिरुत्पत्तिस्थानं यस्य। चतुर्मुखे ब्रह्मणि। विस्तरोऽब्जजशब्दे दृश्यः।

**अब्जवाहन** पु० अब्जस्य चन्द्रस्य वाहनं धारणं येन 'अब्जं शङ्ख इव शुभ्रं वाहनं वृषरूपं यस्य वा। १चन्द्रमौलौ शिवे। अब्जं कमलं वाहनमिवाधारो यस्याः। २पद्मा-सनस्थायां लक्ष्म्याम् "पद्मासनस्थां ध्यायेच्च श्रियं त्रैलोक्यमातरमिति" तद्ध्याने उक्तेः तस्या अब्जवाहनत्वम् कमलादि वाहनाप्यत्र। [उ०द०। तस्य जन्मावधिप्राप्तत्वेन तथात्वम्।

**अब्जस्** न० आप्यते जन्मतः आप—असुन् जुट्—ह्रस्वश्च। रूपे

**अब्जस्थित** पु०। अब्जे विष्णुनाभिकमले स्थितः स्था—क। चतुर्मुखे ब्रह्मणि "स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः देवो अधिकमब्जजशब्दे दृश्यम्।

**अब्जहस्त** पु० अब्जं पद्मं हस्ते यस्य। सूर्य्ये "पद्मासनं पद्महस्तम्" इति तद्ध्यानोक्तेस्तथात्वम्।

**अब्जा** त्रि० अप्सु जायते जन—विट् ७त०। जलजातमात्रे "अब्जामुक्थैरहिं गृणीषे" ऋ०७,२४,१६, "अब्जामप्सुजात-महिम्" भा०।

**अब्जिनी** स्त्री अब्जानां समूहः अब्ज+इनि—ङीप्। पद्मसमूहे। अब्जानां देशः पुष्करा० इनि। २पद्मलतायाम् च।

**अब्जिनीपति** पु० अब्जिन्याः पद्मसमूहस्य पतिः प्रकाशकत्वात्।